# દક્ષિણમુર્તિ વર્ણમાલા સ્તોત્રમ

ૐમિત્યેતદ્યસ્ય બુધૈર્નામ ગૃહીતં
યદ્ભાસેદં ભાતિ સમસ્તં વિયદાદિ .
યસ્યાજ્ઞાતઃ સ્વસ્વપદસ્થા વિધિમુખ્યા-
સ્તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૧..
નમ્રાઙ્ગાણાં ભક્તિમતાં યઃ પુરુષાર્થા-
ન્દત્વા ક્ષિપ્રં હન્તિ ચ તત્સર્વવિપત્તીઃ .
પાદામ્ભોજાધસ્તનિતાપસ્મૃતિમીશં
તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૨..
મોહધ્વસ્ત્યૈ વૈણિકવૈયાસિકિમુખ્યાઃ
સંવિન્મુદ્રાપુસ્તકવીણાક્ષગુણાન્યમ .
હસ્તામ્ભોજૈર્બિભ્રતમારાધિતવન્ત-
સ્તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૩..
ભદ્રારૂઢં ભદ્રદમારાધયિતૃણાં
ભક્તિશ્રદ્ધાપૂર્વકમીશં પ્રણમન્તિ .
આદિત્યા યં વાઞ્છિતસિદ્ધ્યૈ કરુણાબ્ધિં
તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૪..
ગર્ભાન્તઃસ્થાઃ પ્રાણિન એતે ભવપાશ-
ચ્છેદે દક્ષં નિશ્ચિતવન્તઃ શરણં યમ .
આરાધ્યાઙ્ઘ્રિપ્રસ્ફુરદમ્ભોરુહયુગ્મં
તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૫..
વક્ત્રં ધન્યાઃ સંસૃતિવાર્ધેરતિમાત્રા-
દ્ભીતાઃ સન્તઃ પૂર્ણશશાઙ્કદ્યુતિ યસ્ય .
સેવન્તેઽધ્યાસીનમનન્તં વટમૂલં
તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૬..

તેજઃસ્તોમૈરઙ્ગદસંઘટ્ટિતભાસ્વ-
ન્માણિક્યોત્થૈર્ભાસિતવિશ્વો રુચિરૈર્યઃ .
તેજોમૂર્તિં ખાનિલતેજઃપ્રમુખાબ્ધિં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૭..
દધ્યાજ્યાદિદ્રવ્યકકર્માણ્યખિલાનિ
ત્યક્ત્વા કાઙ્ક્ષા કર્મફલેષ્વત્ર કરોતિ .
યજ્જિજ્ઞાસાં રૂપફલાર્થી ક્ષિતિદેવ-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૮..
ક્ષિપ્રં લોકે યં ભજમાનઃ પૃથુપુણ્યઃ
પ્રધ્વસ્તાધિઃ પ્રોજ્ઝિતસંસૃત્યખિલાર્તિઃ .
પ્રત્યગ્ભૂતં બ્રહ્મ પરં સન્રમતે ય-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૯..
ણાનેત્યેવં યન્મનુમધ્યસ્થિતવર્ણા-
ન્ભક્તાઃ કાલે વર્ણગૃહીત્યૈ પ્રજપન્તઃ .
મોદન્તે સંપ્રાપ્તસમસ્તશ્રુતિતન્ત્રા-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૦..
મૂર્તિશ્છાયાનિર્જિતમન્દાકિનિકુન્દ-
પ્રાલેયામ્ભોરાશિસુધાભૂતિસુરેભા .
યસ્યાભ્રાભા હાસવિધૌ દક્ષશિરોધિ-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૧..
તપ્તસ્વર્ણચ્છાયજટાજૂટકટાહ-
પ્રોદ્યદ્વીચીવલ્લિવિરાજત્સુરસિન્ધુમ .
નિત્યં સૂક્ષ્મં નિત્યનિરસ્તાખિલદોષં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૨..
યેન જ્ઞાતેનૈવ સમસ્તં વિદિતં સ્યા-
દ્યસ્માદન્યદ્વસ્તુ જગત્યાં શશશૃઙ્ગમ .

યં પ્રાપ્તાનાં નાસ્તિ પરં પ્રાપ્યમનાદિં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૩..
મત્તો મારો યસ્ય લલાટાક્ષિભવાગ્નિ-
સ્ફૂર્જત્કીલપ્રોષિતભસ્મીકૃતદેહઃ .
તદ્ભસ્માસીદ્યસ્ય સુજાતઃ પટવાસ-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૪..
હ્યમ્ભોરાશૌ સંસૃતિરૂપે લુઠતાં ત-
ત્પારં ગન્તું યત્પદભક્તિર્દૃઢનૌકા .
સર્વારાધ્યં સર્વગમાનન્દપયોનિધિં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૫..
મેધાવી સ્યાદિન્દુવતંસં ધૃતવીણં
કર્પૂરાભં પુસ્તકહસ્તં કમલાક્ષમ .
ચિત્તે ધ્યાયન્યસ્ય વપુર્દ્રાઙ્નિમિષાર્ધં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૬..
ધામ્નાં ધામ પ્રૌઢરુચીનાં પરમં ય-
ત્સૂર્યાદીનાં યસ્ય સ હેતુર્જગદાદેઃ .
એતાવાન્યો યસ્ય ન સર્વેશ્વરમીડ્યં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૭..
પ્રત્યાહારપ્રાણનિરોધાદિસમર્થૈ-
ર્ભક્તૈર્દાન્તૈઃ સંયતચિત્તૈર્યતમાનૈઃ .
સ્વાત્મત્વેન જ્ઞાયત એવ ત્વરયા ય-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૮..
જ્ઞાંશીભૂતાન્પ્રાણિન એતાન્ફલદાતા
ચિત્તાન્તઃસ્થઃ પ્રેરયતિ સ્વે સકલેઽપિ .
કૃત્યે દેવઃ પ્રાક્તનકર્માનુસરઃ સં-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ .. ૧૯..

પ્રજ્ઞામાત્રં પ્રાપિતસંબિન્નિજભક્તં
પ્રાણાક્ષાદેઃ પ્રેરયિતારં પ્રણવાર્થમ .
પ્રાહુઃ પ્રાજ્ઞા વિદિતાનુશ્રવતત્ત્વા-
સ્તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૨૦..
યસ્યાંજ્ઞાનાદેવ નૃણાં સંસૃતિબોધો
યસ્ય જ્ઞાનાદેવ વિમોક્ષો ભવતીતિ .
સ્પષ્ટં બ્રૂતે વેદશિરો દેશિકમાદ્યં
તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૨૧..
છન્નેઽવિદ્યારૂપપટેનૈવ ચ વિશ્વં
યત્રાધ્યસ્તં જીવપરેશત્વમપીદમ .
ભાનોર્ભાનુષ્વમ્બુવદસ્તાખિલભેદં
તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૨૨..
સ્વાપસ્વપ્નૌ જાગ્રદવસ્થાપિ ન યત્ર
પ્રાણશ્ચેતઃ સર્વગતો યઃ સકલાત્મા .
કૂટસ્થો યઃ કેવલસચ્ચિત્સુખરૂપ-
સ્તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૨૩..
હા હેત્યેવં વિસ્મયમીયુર્મુનિમુખ્યા
જ્ઞાતે યસ્મિન્સ્વાત્મતયાનાત્મવિમોહઃ .
પ્રત્યગ્ભૂતે બ્રહ્મણિ યાતઃ કથમિત્થં
તં પ્રત્યચં દક્ષિણવક્ત્રં કલયામિ .. ૨૪..
યૈષા રમ્યૈર્મત્તમયૂરાભિધવૃત્તૈ-
રાદૌ ક્લૃપ્તા યન્મનુવર્ણૈર્મુનિભઙ્ગી .
તામેવૈતાં દક્ષિણવક્ત્રઃ કૃપયાસા-
વૂરીકુર્યાદ્દેશિકસમ્રાટ પરમાત્મા .. ૨૫..
ઇતિ શ્રીમત્પરમહંસપરિવ્રજકાચાર્યસ્ય
શ્રિગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય

શ્રીમચ્છંકરભગવત્પાદ કૃતૌ
શ્રીદક્ષિણામૂર્તિવર્ણમાલાસ્તોત્રં સંપૂર્ણમ ..